# झारखण्ड शैक्षिक अनुसन्धान एवं प्रशिक्षण परिषद्, राँची

**वार्षिक परीक्षा 2023-24**

**आदर्शप्रश्नपत्रम्**

**संस्कृतम्**

**(बहुविकल्पीयाः प्रश्नाः)**

**कक्षा – अष्टमी** | **विषयः - संस्कृतम्**

**समयः - 60 निमेषाः** | **पूर्णांकाः – 50**

**सामान्य निर्देशाः -**

- **अस्मिन् प्रश्नपत्रे 50 प्रश्नाः। (इस प्रश्न-पत्र में 50 प्रश्न हैं।)**
- **सर्वे प्रश्नाः अनिवार्याः। (सभी प्रश्न अनिवार्य हैं।)**
- **प्रत्येक प्रश्नार्थं एकोऽङ्को निर्धारितः। (प्रत्येक प्रश्न के लिए एक अंक निर्धारित है।)**
- **प्रत्येक प्रश्नस्य चत्वारो विकल्पाः। उचितविकल्पं चिनुत। (प्रत्येक प्रश्न के चार विकल्प दिए गए हैं। उचित विकल्प का चयन करें।)**
- **अनुचितोत्तरार्थं कोऽपि नकारात्मकाङ्को नास्ति। (गलत उत्तर के लिए कोई नकारात्मक अंक नहीं है।)**

---

नवोन्मेष शोध नेतृत्व
JCERT

## अपठितावबोधनम्

**अधोलिखितं गद्यांशं पठित्वा प्रदत्तान् प्रश्नान् विकल्पेभ्यः उत्तरं चिनुत-**

■. आधुनिके औद्योगिके युगे प्रदूषणस्य समस्या दिनं प्रतिदिनं वर्धते एव कुत्रापि स्वच्छः वायुः न प्राप्यते, न स्वच्छजलं लभ्यते न च स्वच्छानि खाद्यपदार्थानि प्राप्यन्ते । अद्यत्वे यन्त्रालयानां यानानां च धूमेन सम्पूर्णवायुमण्डलं दूषितं सञ्जातम्। दूषितः वायुः एव श्वासेन हृदये प्रविशति । अतः विविधाः श्वासरोगाः, हृदयरोगाः, धर्मरोगाः नेत्ररोगाः च जनान् पीडयन्ति। वायुप्रदूषणस्य प्रमुखतमं कारणम् औद्योगिकविकासः अस्ति। वृक्षाणां विनाशं कृत्वा जनाः औद्योगिकक्षेत्राणां विकास तु कुर्वन्ति किन्तु ते प्रकृतिदेवीमपि सम्पीडयन्ति । विज्ञानस्य प्रगत्या नित्यं नूतनयन्त्राणामपि आविष्कारः भवति । अतः अस्माभिः सर्वैः मिलित्वा प्रदूषणसमस्यायाः समाधानं कर्तव्यम्।

1.आधुनिके औद्योगिके युगे कस्य समस्या दिनं-प्रतिदिनं वर्धते ?
(क) विज्ञानस्य
(ख) प्रदूषणस्य
(ग) परीक्षायाः
(घ) जनसंख्यायाः

2.कस्य प्रगत्याः नित्यं नूतनयन्त्राणामपि आविष्कारः भवति ?
(क) प्रदूषणस्य
(ख) जनसंख्यायाः

(ग) परीक्षायाः
(घ) विज्ञानस्य
3. दूषितः वायुः कथं हृदये प्रविशति ?
(क) कर्णेन
(ख) हृदयेन
(ग) श्वासेन
(घ) नेत्रेण
4.'दुःखीकुर्वन्ति' अस्य पदस्य अनुच्छेदे कः पर्यायः ?
(क) प्राप्यन्ते
(ख) क्रीडन्ति
(ग) कुर्वन्ति
(घ) सम्पीडयन्ति
5.विविधाः रोगाः कान् पीडयन्ति?
(क) यानानि
(ख) जनान्
(ग) विज्ञानम्
(घ) पुस्तकानि
6.सम्पूर्णवायुमण्डलं केन दूषितं जातम् ?
(क) वायुना
(ख) अग्निना
(ग) जलेन
(घ) धूमेन
7.'प्राप्यन्ते' इति क्रियायाः कर्तृपदं किम्?
(क) स्वच्छजलम्
(ख) खाद्यपदार्थानि
(ग) प्रकृतिदेवीम्
(घ) वायुम्

8.'मलिनम्' अस्य किं विपर्ययपदं प्रयुक्तम् ?
(क) स्वच्छम्
(ख) अमलिनम्
(ग) अस्वच्छम्
(घ) पवित्रम्
9. 'अस्माभिः' अस्य मूलशब्दं चिनुत-
(क) अहम्
(ख) अस्मद्
(ग) युष्मद्
(घ) अदस्

10. 'वृक्षाणां' पदे किं वचनम् ?
(क) एकवचनम्
(ख) द्विवचनम्
(ग) बहुवचनम्
(घ) सत्यवचनम्

**पठितावबोधनम्**

**अधोलिखितं गद्यांशं पद्यं नाट्यांशं वा पठित्वा प्रदत्तान् प्रश्नान् विकल्पेभ्यः उत्तरं चिनुत-**

**गद्यांशः**

एकदा अर्चकः मन्दिरसम्मुखे विद्यमाने सरोवरे स्नानं कृत्वा मन्दिरं प्रति गच्छति तदा मार्गे एकेन लघुस्थाणुना तस्य पादे आघातः प्राप्तः। यदा अर्चकः तं खनित्वा अपसारितवान् तदा तत्र तेन एकः कनककलशः दृष्टः। कलशे अनेकाः स्वर्णमुद्राः आसन्। सः अचिन्तयत् यत् इदं धनं मम नास्ति, अतः इदं न ग्रहणीयम्। सः गृहं गत्वा तां वार्तां स्वभार्याम् अकथयत्। तस्य भार्या अपि अतीव सत्यव्रता आसीत्। तया उक्तम् परधनं न ग्रहणीयम्।

**प्रश्नाः**

11. अर्चकः कुत्र स्नानम् अकरोत् ?
(क) सरोवरे
(ख) कूपे
(ग) नद्याम्
(घ) वर्षाजले

12. स्वर्णमुद्राः कुत्र आसन् ?
(क) स्थाल्याम्
(ख) चषके
(ग) कलशे
(घ) सरोवरे

13. अर्चकस्य भार्या कीदृशी आसीत् ?
(क) कठोरा
(ख) स्निग्धा
(ग) मुग्धा
(घ) सत्यव्रता

14. '**गच्छति**' पदे कः लकारः ?
(क) लङ्गलकारः
(ख) लोट्लकारः
(ग) लट्लकारः
(घ) लृट्लकारः

15. '**विमुखे**' अस्य किं विलोमपदम् अत्र प्रयुक्तम्?
(क) आमुखे
(ख) षण्मुखे

(ग) दुर्मुखे

(घ) सम्मुखे

**पद्यम्**

**शरदि न वर्षति गर्जति**

**वर्षति वर्षासु निःस्वनो मेघः ।**

**नीचो वदति न कुरुते**

**न वदति सुजनः करोत्येव ॥**

**16.** कः केवलं वदति , न करोति ?

**(क)** नीचः

(ख) मध्यमः

(ग) उत्तमः

(घ) सुजनः

17. कस्यां ऋतौ मेघः वर्षति ?

(क) ग्रीष्मर्तौ

(ख) वर्षा ऋतौ

(ग) वसन्तर्तौ

(घ) शरद् ऋतौ

18. '**जलधरः**' अस्य किं पर्यायपदम् अत्र प्रयुक्तम्?

(क) शरदि

(ख) वर्षासु

(ग) नीचः

(घ) मेघः

19. '**दुर्जनः**' अस्य विलोमपदं चिनुत-

(क) गुञ्जनः

(ख) सखीजनः

(ग) सुजनः

(घ) सुधीजनः

20. '**करोति**' अस्य मूलधातुं लिखत-

(क) कर्

(ख) कृ

(ग) क्री

(घ) क्रीड्

## नाट्यांशः

**धनेश्वर**: - कथं न ! मम पुत्रस्य विवाहः तु करणीयः एव ,परन्तु विवाहे अहम् एकमपि रुप्यकं व्ययं न करिष्यामि।

**पन्ना** – मम पुत्री अतीवसुशीला सुन्दरी गृहकार्यदक्षा सुशिक्षिता चास्ति। अहं निजपक्षतः पूर्णप्रयासं करिष्यामि।

**धनेश्वरः** - सम्यगस्ति। अहं कन्यां दृष्ट्वा निश्चयं करिष्यामि। (किञ्चिद्दिनानन्तरं धनेश्वरः कन्यायाः गृहं गच्छति।

पन्ना रामवृक्षश्च तस्य सत्कारं कुरुतः।)

**धनेश्वरः** - कन्या तु सुन्दरी अस्ति। मम पुत्रानुरूपा चास्ति। विवाहः अग्रिममासस्य षड्विंशदिनाङ्के भविष्यति। मम प्रतिष्ठानुसारम् आयोजनं भवेत्।

**प्रश्नाः**

21. कस्याः पुत्री अतीवसुशीला सुन्दरी गृहकार्यदक्षा सुशिक्षिता चास्ति ?
(क) रामवृक्षस्य
(ख) धनेश्वरस्य
(ग) आदर्शस्य
(घ) पन्नायाः

22. धनेश्वरस्य सत्कारं कौ कुरुतः?
(क) पन्ना
(ख) रामवृक्षः
(ग) पन्ना रामवृक्षः च
(घ) न कोऽपि

23. कः कन्यायाः गृहं गच्छति ?
(क) धनेश्वरः
(ख) पन्ना
(ग) स्मृतिः
(घ) आदर्शः

24.' **अशिक्षिता**' इत्यस्य किं विलोमपदम् अत्र प्रयुक्तम्?
(क) सत्कारम्
(ख) प्रतिष्ठा
(ग) सुशिक्षिता
(घ) अनन्तरम्

25. '**करिष्यामि**' पदे कः लकारः ?
(क) लट्लकारः
(ख) लृट्लकारः
(ग) लोट्लकारः
(घ) लङ्गलकारः

नवोन्मेष शोध नेतृत्व JCERT

**निर्देश: प्रत्ययं संयोज्य वियोज्य वा लिखत-**

26. दृश्+क्त्वा= ?

(क) दृश्क्त्वा

(ख) दर्शिक्त्वा

(ग) दृष्ट्वा

(घ) दृश्ट्वा

27. **'श्रोतुम्'** इत्यस्मिन् क: प्रत्यय: ?

(क) तुमुन्

(ख) क्त्वा

(ग) तव्यत्

(घ) ल्यप्

28. विहस्य = वि+ हस् +------।

(क) क्त्वा

(ख) तुमुन्

(ग) क्त्वा

(घ) ल्यप्

**निर्देश:- अधोलिखितानां पदानां पर्यायपदम् विकल्पेभ्य: चिनुत -**

29. **'गङ्गा'** अस्य पर्यायपदम् किम् ?

(क) शतद्रु:

(ख) कालिन्दी

(ग) भागीरथी

(घ) वितस्ता

30. **'पाणि:'** शब्दस्य अर्थं चिनुत-

(क) हस्त:

(ख) पादम्

(ग) जलम्

(घ) लवणम्

31.' **तूष्णीम्** ' अस्य समानार्थकपदं किम् ?

(क) उष्णम्

(ख) मौनम्

(ग) त्वमेव

(घ) अधुना

**निर्देश: - अधोलिखितानां पदानां विलोमपदम् विकल्पेभ्य: चिनुत –**

32**. 'उन्नति:'** अस्य विलोमपदम् किम् ?

(क) सम्पत्ति:

(ख) विकृति:

(ग) अवनति:

(घ) सङ्गति:

33. ‘ **गुरुः**’ अस्य विपर्ययपदं किम् ?

(क) लघुः

(ख) वृहत्

(ग) विशालः

(घ) महान्

34. ‘ **नगरम्**’ पदस्य विलोमपदम् किम् ?

(क) जनपदः

(ख) ग्रामम्

(ग) मार्गम्

(घ) क्षेत्रम्

**प्रश्ननिर्माणम्-रेखाङ्कितपदम् आधृत्य प्रश्नवाचकशब्दं चिनुत-**

35. **श्रीकृष्णः** उपदेशम् अयच्छत्।

(क) किम्

(ख) का

(ग) कस्य

(घ) कः

36. **सावरकरस्य** जीवनचरितं पठनीयम्।

(क) किम्

(ख) का

(ग) कस्य

(घ) कः

37. **रात्रौ** जागरणं भवति।

(क) किम्

(ख) कदा

(ग) कस्य

(घ) कः

**निर्देशः - भिन्नपदं चिनुत-**

38. पत्राणि, फलानि, पुष्पाणि, मित्राणि।

(क) पत्राणि

(ख) फलानि

(ग) पुष्पाणि

(घ) मित्राणि

39. छात्रः, शिक्षकः, सेवकः, लेखिका।

(क) लेखिका

(ख) शिक्षकः

(ग) छात्रः

(घ) सेवकः

40. व्याघ्र:, भल्लूक:,गज:, कपोत:, सिंह:।

(क) गज

(ख) कपोत:

(ग) व्याघ्र:

(घ) भल्लूक:

**निर्देश: - सन्धिं विच्छेदं वा कुरुत-**

**41.** विद्यार्थी =------+---------

**(क)** विद्या + अर्थी

(ख) विद् + यार्थी

(ग) वि + द्यार्थी

(घ) विद्यार् + थी

42. नदी+ ईश:= ----------।

(क) नदिश:

(ख) नदीश:

(ग) नद्दीश:

(घ) नद्यीश:

43. लघु+ उर्मि: =---------।

(क) लघुर्मि:

(ख) लघ्वर्मि:

(ग) लघ्यूर्मि:

(घ) लघूर्मि:

44. रामायणम्=----------+-------।

(क) राम + अयनम्

(ख) रामा + अयणम्

(ग) रामाय + णम्

(घ) राम: + अयणम्

**निर्देश: - अधोलिखितवाक्येषु अव्ययपदं विकल्पेभ्य: चिनुत-**

45. पिबन्ति नद्य: स्वयमेव नाम्भ:।

(क) एव

(ख) अम्भ:

(ग) नद्य:

(घ) पिबन्ति

46. अलसस्य कुत: विद्या अविद्यस्य कुत: धनम् ।

(क) अविद्यस्य

(ख) अलसस्य

(ग) कुत:

(घ) धनम्

47. अहं भवत: विरुद्धं कदापि न गच्छामि।

(क) भवत:
(ख) अपि
(ग) विरुद्धं
(घ) गच्छामि

**निर्देश:- श्लोकांशेषु रिक्तस्थानानि विकल्पेभ्य: पूरयत-**

48. षडदोषा: पुरुषेणेह हातव्या भूतिमिच्छता। ---------- तन्द्रा भयं क्रोध: आलस्यं दीर्घसूत्रता ॥
(क) निद्रा
(ख) कन्दरा
(ग) मान्दरम्
(घ) भद्रा

49. ----------- सतां विभूतय:।
(क) पदाय
(ख) परोपकाराय
(ग) धनाय
(घ) रुप्यकाय

50. --------- तपो नास्ति, न संतोषात् परं सुखम्।
(क) बलतुल्यं
(ख) शक्तितुल्यं
(ग) शान्तितुल्यं
(घ) निद्रातुल्यं

---

नवोन्मेष शोध नेतृत्व JCERT

# झारखण्ड शैक्षिक अनुसन्धान एवं प्रशिक्षण परिषद्, राँची।
## वार्षिक परीक्षा 2023-24
## आदर्शप्रश्नपत्रम्
## संस्कृतम्
## (बहुविकल्पीयाः प्रश्नाः)

**कक्षा – अष्टमी** **विषयः - संस्कृतम्**

## उत्तराणि

1. (ख) प्रदूषणस्य
2. (घ) विज्ञानस्य
3. (ग) श्वासेन
4. (घ) सम्पीडयन्ति
5. (ख) जनान्
6. (घ) धूमेन
7. (ख) खाद्यपदार्थानि
8. (क) स्वच्छम्
9. (ख) अस्मद्
10. (ग) बहुवचनम्
11. (क) सरोवरे
12. (ग) कलशे
13. (घ) सत्यव्रता
14. (ग) लट्लकारः
15. (घ) सम्मुखे
16. (क) नीचः
17. (ख) वर्षा ऋतौ
18. (घ) मेघः
19. (ग) सुजनः
20. (ख) कृ
21. (घ) पन्नायाः
22. (ग) पन्ना रामवृक्षः च
23. (क) धनेश्वरः
24. (ग) सुशिक्षिता
25. (ख) लृट्लकारः
26. (ग) दृष्ट्वा
27. (क) तुमुन्
28. (घ) ल्यप्
29. (ग) भागीरथी
30. (क) हस्तः
31. (ख) मौनम्
32. (ग) अवनतिः
33. (क) लघुः
34. (ख) ग्रामम्
35. (घ) कः
36. (ग) कस्य
37. (ख) कदा
38. (घ) मित्राणि
39. (क) लेखिका
40. (ख) कपोतः
41. (क) विद्या + अर्थी
42. (ख) नदीशः
43. (घ) लघूर्मिः
44. (क) राम + अयणम्
45. (क) एव
46. (ग) कुतः
47. (ख) अपि
48. (क) निद्रा
49. (ख) परोपकाराय
50. (ग) शान्तितुल्यं

नवोन्मेष शोध नेतृत्व JCERT